# शचीसून्वष्टकम्

हरिर्दृष्ट्वा गोष्ठे मुकुरगतमात्मानमतुलं
स्वमाधुर्यं राधप्रियतरसखीवाप्तुमभितः ।
अहो गौडे जातः प्रभुरपरगौरैकतनुभाक्
शचीसूनुः किं मे नयनसरणीं यास्यति पदम् ॥१॥

पुरीदेवयान्तःप्रणयमधुना स्नानमधुरो
मुहुर्गोविन्दोद्यद्विशदपरिचर्यार्चितपदः ।
स्वरूपस्य प्राणार्बुदपरिचर्यार्चितपदः
शचीसूनुः किं मे नयनसरणीं यास्यति पदम् ॥२॥

दधानः कौपीनं तदुपरि बहिर्वस्त्रमरुणं
प्रकाण्डो हेमाद्रिद्युतिभिरभितः सेविततनुः ।
मुदा गायन्नुच्चैर्निजमधुरनामावलिमसौ
शचीसूनुः किं मे नयनसरणीं यास्यति पदम् ॥३॥

अनावेद्यां पूर्वैरपि मुनिगणैर्भक्तिनिपुणैः
श्रुतेर्गूढां प्रेमोज्ज्वलरसफलां भक्तिलतिकाम् ।
कृपालुस्तां गौडे प्रभु अतिकृपाभिः प्रकटयन्
शचीसूनुः किं मे नयनसरणीं यास्यति पदम् ॥४॥

निजत्वे गौडीयान्जगति परिगृह्य प्रभुरिमान्
हरे कृष्णेत्येवं गणनविधिना कीर्तयत भोः।
इति प्रायां शिक्षां चरणमधुपेभ्यः परिदिशन्
शचीसूनुः किं मे नयनसरणीं यास्यति पदम्॥५॥

पुरः पश्यन्नीलाचलपतिमुरुप्रेमनिवहैः
क्षरन्नेत्राम्भोभिः स्नपितनिजदीर्घोज्ज्वलतनुः।
सदा तिष्ठन्देशे प्रणयिगरुडस्तम्भचरमे
शचीसूनुः किं मे नयनसरणीं यास्यति पदम्॥६॥

मुदा दन्तरि दृष्ट्वा द्युतिविजितबन्धूकमधरं
करं कृत्वा वामं कटिनिहितमन्यं परिलसन्।
समुत्थाप्य प्रेम्णागणितपुलको नृत्यकुतुकी
शचीसूनुः किं मे नयनसरणीं यास्यति पदम्॥७॥

सरोत्तीरारामे विरहविधुरो गोकुलविधो
र्नदीमन्यां कुर्वन्नयनजलधाराविततिभिः।
मुहुर्मूर्च्छां गच्छन्मृतकमिव विश्वं विरचयन्
शचीसूनुः किं मे नयनसरणीं यास्यति पदम्॥८॥

शचीसूनोरस्याष्टकमिदमभीष्टं विरचयन्
सदा दैन्योद्रेकादतिविशदबुद्धिः पठति यः।
प्रकामं चैतन्यः प्रभुरतिकृपावेशविवशः

पृथुप्रेमाम्भोधौ प्रथितरसदे मज्जयति तम् ॥९॥

इति श्रीरघुनाथदासगोस्वामिविरचितस्तवावल्यां श्रीशचीसून्वष्टकं सम्पूर्णम् ।